# Shri Dakshina Sheshachalesha Shrinivasa Bhagavat Prapatti

# શ્રીદક્ષિણશેષાચલેશશ્રીનિવાસભગવત્પ્રપત્તિઃ

## Document Information

Text title : Shri Dakshina Sheshachalesha Shrinivasa Bhagavat Prapatti

File name : dakShiNAsheShAchaleshashrInivAsabhagavatprapattiH.itx

Category : vishhnu, prapatti, venkateshwara

Location : doc_vishhnu

Author : saralakavi rAghavAchArya

Transliterated by : Aruna Narayanan narayanan.aruna at gmail.com

Proofread by : Aruna Narayanan narayanan.aruna at gmail.com

Description/comments : for the Deity on the hill of Vaiyavur

Latest update : March 20, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 22, 2020

*sanskritdocuments.org*

# શ્રીદક્ષિણશેષાચલેશશ્રીનિવાસભગવત્પ્રપત્તિઃ

શ્રીમતે પ્રસન્નવેઙ્કટેશશ્રીનિવાસાય નમઃ ।
શ્રીનિવાસહૃદયઙ્ગમાં રમાં સન્નમદ્ભવખિદાપહારિણીમ્ ।
નિત્યફુલ્લસરસીરુહાસનાં સુસ્મિતાં શરણમાશ્રયેશ્રિયમ્ ॥ ૧॥

સર્વજ્ઞ શક્તિભિરુપેત સમસ્તહેતો
  સર્વેશ સર્વગુણ સર્વ હરે દયાલો ।
લક્ષ્મીપતે પ્રણતવત્સલ ચક્રપાણે
  શ્રીશ્રીનિવાસ ચરણૌ શરણં પ્રપદ્યે ॥ ૨॥

વજ્રધ્વજાઙ્કુશ સરોરુહશઙ્ખ ચક્રૈ-
  રેખામયૈઃ શુભકરૈઃ પરમત્વચિન્હૈઃ ।
કાન્તૈર્વિભૂષિતતલૌ તવ દેવદેવ
  શ્રીશ્રીનિવાસ ચરણૌ શરણં પ્રપદ્યે ॥ ૩॥

અત્યર્થ માર્દવયુતૈઃ કરપલ્લવૈઃ સ્વૈઃ
  સંવાહને વિરચિતે કમલાધરાભ્યામ્ ।
તજ્જક્લમાસહનસૂચકરક્તવર્ણૌ
  શ્રીશ્રીનિવાસ ચરણૌ શરણં પ્રપદ્યે ॥ ૪॥

બ્રહ્મેશદેવપતયો નિયતાધિકારાઃ
  સદ્યસ્તરન્તિ વિપદો હિ યયોઃ પ્રણામાત્ ।
સ્થાસ્નું ભજન્તિ ચ સમીહિતસિદ્ધિમેતૌ
  શ્રીશ્રીનિવાસ ચરણૌ શરણં પ્રપદ્યે ॥ ૫॥

યત્સંશ્રિતપ્રિય જનાવન નિત્યસક્તો
  દેવ્યાશ્રિયા કનસિ દક્ષિણશેષશૈલે ।
તૌ નિત્યમુક્તજનભોગ્યતમાવુદારૌ
  શ્રીશ્રીનિવાસ ચરણૌ શરણં પ્રપદ્યે ॥ ૬॥

ભાવત્કપૂજનવિધાવુપયોગભાજાં
    ઉત્તુઙ્ગસૌરભભૃતાં તુલસીદલાનામ્ ।
સ્વચ્છન્દકેલિનિલયાવિવ ભાસમાનૌ
    શ્રીશ્રીનિવાસ ચરણૌ શરણં પ્રપદ્યે ॥ ૭॥

ત્રૈલોક્યવિક્રમવિધિપ્રસિતૌ તદા યૌ
    ઇન્દ્રં બલિં ત્રિભુવનં ચ કૃતાર્થયન્તૌ ।
સર્વેશિતુસ્તવ યશોઽપુષતાં ભૃશં તૌ
    શ્રીશ્રીનિવાસ ચરણૌ શરણં પ્રપદ્યે ॥ ૮॥

રામાત્મનસ્તવ શિલા મિથિલાપ્રયાણે
    સ્પૃષ્ટા યદીયરજસા કિલ શાપમુક્તા ।
જાતા હિ ગૌતમવધૂર્બત તૌ નિષેવ્યૌ
    શ્રીશ્રીનિવાસ ચરણૌ શરણં પ્રપદ્યે ॥ ૯॥

તૌ દણ્ડકાવનનિવાસિતપોધનાનાં
    ક્ષેમાનુયોગ પદપદ્મનિષેવણાર્થમ્ ।
પ્રત્યાશ્રમં રઘુપ તે ગમને સહાયૌ
    શ્રીશ્રીનિવાસ ચરણૌ શરણં પ્રપદ્યે ॥ ૧૦॥

હે બાલકૃષ્ણ ભવતો હનેનપ્રસક્તં
    દૈત્યં વિપોથ્ય તરસા શકટં બલાઢ્યમ્ ।
રક્ષાવિધેસ્તવ દિશાસ્વધિરૂઢકીર્તિ
    શ્રીશ્રીનિવાસ ચરણૌ શરણં પ્રપદ્યે ॥ ૧૧॥

સોલૂખલસ્ય તવ દામનિ બદ્ધમૂર્તેઃ
    ગન્ધર્વયુગ્મતરુતામપનેતુમિચ્છોઃ ।
હે બાલકૃષ્ણ બતચઙ્ક્રમણે સખાયૌ
    શ્રીશ્રીનિવાસ ચરણૌ શરણં પ્રપદ્યે ॥ ૧૨॥

હે વાસુદેવ યમુનાહ્રદવાસિઘોર-
    દુષ્કૃત્યકાલિયફણાવલિરઙ્ગમધ્યે ।
નિશ્શઙ્કનર્તનકૃતો ભવતોઽનુકૂલૌ
    શ્રીશ્રીનિવાસ ચરણૌ શરણં પ્રપદ્યે ॥ ૧૩॥

હે કૃષ્ણ પાણ્ડવસખ ત્વરયોત્તરાયા
    ગર્ભં પ્રવિશ્યભસિતત્વદશાન્નિરસ્ય ।

સન્તાનબીજમવતો ભવતઃ સહાયૌ
    શ્રીશ્રીનિવાસ ચરણૌ શરણં પ્રપદ્યે ॥ ૧૪॥

યૌ દ્રાવિડસ્ય સુકવેઃ શઠકોપસૂરે-
    ર્જિહ્વાગ્રપીઠમધિગમ્ય હરે સુહૃદ્ધામ્ ।
ગાધામયીમપુષતાં ભવતઃ સ્તુતિં તૌ
    શ્રીશ્રીનિવાસ ચરણૌ શરણં પ્રપદ્યે ॥ ૧૫॥

સીતાભિરામમહનીય મહાર્હણોત્ક
    શ્રીશ્રીનિવાસભગવચ્ચરણપ્રપત્તિમ્ ।
શ્રીરાઘવોઽકૃત કવિઃ પદવિત્ સ ઇત્થં
    ગમ્ભીરભાવરુચિરૈસ્સરલૈઃ સ્વપદ્યૈઃ ॥ ૧૬॥

ઇતિ શ્રીદક્ષિણશેષાચલેશ શ્રીશ્રીનિવાસ ભગવત્પ્રપત્તિઃ સમાપ્તા ।

Proofread by Aruna Narayanan

*Shri Dakshina Sheshachalesha Shrinivasa Bhagavat Prapatti*
pdf was typeset on March 22, 2020

Please send corrections to *sanskrit@cheerful.com*